# Shri Sudarshana Stotram 3

# શ્રીસુદર્શનસ્તોત્રમ્ ૩

## Document Information

Text title : Shri Sudarshana Stotram 3 03 14

File name : sudarshanastotram3.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 03-14

Latest update : August 14, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2021

*sanskritdocuments.org*

# શ્રીસુદર્શનસ્તોત્રમ્ ૩

શ્રીમન્નારાયણં દેવં બ્રહ્મરુદ્રાદિવન્દિતમ્ ।
સર્વલોકનિયન્તારં નમામિ પુરુષોત્તમમ્ ॥ ૧॥

શ્રીમદ્રામાનુજાચાર્યપૌત્રસ્તત્પાદસંશ્રિતઃ ।
શ્રીરઙ્ગાર્યગુરોઃ પુત્રઃ શ્રીરામાહ્વયદેશિકઃ ॥ ૨॥

શ્રીવાધૂલકુલોદ્ભૂતસ્તપચક્રવિધાયકમ્ ।
સ્તોત્રં સૌદર્શનં ચક્રે વેદવેદાન્તગોચરમ્ ॥ ૩॥

પવિત્રં ત ઇતિ પ્રોક્તં વેદેષુ ત્રિષુ ચ સ્થિતમ્ ।
ચરણં તૈત્તિરીયે તુ missing in the manuscript ॥ ૪॥

લોકસ્ય દ્વારમિત્યેતદ્વાક્યં તત્રૈવ ચોદિતમ્ ।
ચમૂ ષુ ચેતિ યદ્વાક્યં તત્રોક્તમૃચિ સામ્નિ ચ ॥ ૫॥

મૈત્રાવરુણશાખાયાં પઠ્યતે સુમહાત્મભિઃ ।
ચક્રં બિભર્તીત્યૃગ્વેદે ખિલે સમ્યક્ પ્રકીર્તિતમ્ ॥ ૬॥

અથર્વણોપનિષદિ હ્યેભિર્વયમિતિ સ્મૃતમ્ ।
ઋચિ પૌષ્કલશાખાયાં પ્રતિવિષ્ણો ઇતીરિતમ્ ॥ ૭॥

ધૃતોર્ધ્વપુણ્ડ્રમિતિ યદથ શાખોદિતં હિ તત્ ।
દક્ષિણે ત્વિતિ યદ્વાક્યં મહોપનિષદિ સ્થિતમ્ ॥ ૮॥

વષટ્ ઇતિ ચ યદ્વાક્યં કઠવલ્લ્યાં તદીરિતમ્ ।
તાપનીયે તુ તં પ્રાપ્તમિતિ મન્ત્રમુદાહૃતમ્ ॥ ૯॥

યજ્ઞોપવીતીત્યારભ્ય યે વા શૂન્યં ત ઇત્યપિ ।
સુદર્શનોપનિષદિ વેદવિદ્ભિસ્તુ પઠ્યતે ॥ ૧૦॥

તસ્માદ્બ્રાહ્મણવાક્યં તુ શ્વેતાશ્વતરચોદિતમ્ ।
તત્રોપવીતાદિ પઞ્ચ કથ્યતે સુમહાત્મભિઃ ॥ ૧૧॥

કાત્યાયનેતિ હોવાચેત્યેવં શતપથેરિતમ્ ।
તત્રૈવ કથિતં ચક્રં દ્વિભુજે ધાર્યમિત્યપિ ॥ ૧૨॥

તત્રૈવ દશપર્યાયૈઃ કથિતં ચક્રધારણમ્ ।
દેવાસ ઇતિ વાક્યં ચ તત્રૈવ પરિકથ્યતે ॥ ૧૩॥

વિવસ્વત ઇતિ હ્યેતદ્વાક્યં તત્રૈવ સંસ્થિતમ્ ।
ચક્રમાદાયેતિ વાક્યં સ્થિતં યત્તદથર્વણે ॥ ૧૪॥

તથૈવ પાઞ્ચજન્યં ચ પઠ્યતે વેદવિત્તમૈઃ ।
અગ્નિનેતિ તથા વાક્યં તત્રૈવ પરિપઠ્યતે ॥ ૧૫॥

ઇત્યેવં તપ્તચક્રસ્ય ધારણં શ્રુતિચોદિતમ્ ।
તસ્માત્ સર્વપ્રયત્નેન ધાર્યં મોક્ષફલેપ્સુભિઃ ॥ ૧૬॥

બ્રહ્મચારી ગૃહી વાનપ્રસ્થ ઇત્યાશ્રમૈસ્તથા ।
બ્રાહ્મણૈઃ ક્ષત્રિયૈર્વૈશ્યૈઃ શૂદ્રૈશ્ચાપિ તથા પરૈઃ ॥ ૧૭॥

અનુલોમૈર્વિલોમૈશ્ચ ભક્તિશ્રદ્ધાસમન્વિતૈઃ ।
સુવાસિનીભિર્નારીભિર્વિધવાભિસ્તથૈવ ચ ॥ ૧૮॥

વિષ્ણોઃ સુદર્શનં ધાર્યં વેદવેદાન્તગોચરમ્ ।
ઇતિ સૌદર્શનં સ્તોત્રમકરોદ્રામદેશિકઃ ॥ ૧૯॥

ઇતિ શ્રીસુદર્શનસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Sudarshana Stotram 3*

pdf was typeset on August 14, 2021

Please send corrections to *sanskrit@cheerful.com*